
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.29- षष्ठः सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

श्रीमद्भागवतमहापुराणम्

एकादशः स्कन्धः

॥ अथैकोनत्रिंशोऽध्यायः॥

उद्धव उवाच

सुदुश्चरामिमां(म्) मन्ये, योगचर्यामनात्मनः ।
यथां(ञ्)जसा पुमान् सिद्ध्येत्, तन्मे ब्रूह्यं(ञ्)जसाच्युत॥ 1॥

प्रायशः(फ्) पुण्डरीकाक्ष, युं(ञ्)जन्तो योगिनो मनः ।
विषीदन्त्यसमाधानान्- मनोनिग्रहकर्शिताः ॥ 2॥

अथात आनन्ददुघं(म्) पदाम्बुजं(म्),
हं(म्)साः(श्) श्रयेरन्नरविन्दलोचन ।

सुखं(न्) नु विश्वेश्वर योगकर्मभिस्-

त्वन्माययामी विहता न मानिनः ॥ 3॥

किं(ञ्) चित्रमच्युत तवैतदशेषबन्धो,

दासेष्वनन्यशरणेषु यदात्मसात्त्वम् ।

योऽरोचयत् सह मृगैः(स्) स्वयमीश्वराणां(म्)

श्रीमत्किरीटतटपीडितपादपीठः ॥ 4॥

तं(न्) त्वाखिलात्मदयितेश्वरमाश्रितानां(म्),

सर्वार्थदं(म्) स्वकृतविद् विसृजेत को नु ।

को वा भजेत् किमपि विस्मृतयेऽनु भूत्यै,

किं(वँ) वा भवेन्न तव पादरजोजुषां(न्) नः ॥ 5॥

नैवोपयन्त्यपचितिं(ङ्) कवयस्तवेश,

ब्रह्मायुषापि कृतमृद्धमुदः(स्) स्मरन्तः ।

योऽन्तर्बहिस्तनुभृतामशुभं(वँ) विधुन्वन्-

नाचार्यचैत्यवपुषा स्वगतिं(वँ) व्यनक्ति ॥ 6॥

श्रीशुक उवाच

इत्युद्धवेनात्यनुरक्तचेतसा,

पृष्टो जगत्क्रीडनकः(स्) स्वशक्तिभिः ।

गृहीतमूर्तित्रय ईश्वरेश्वरो,

जगाद सप्रेममनोहरस्मितः ॥ 7॥

श्रीभगवानुवाच

हन्त ते कथयिष्यामि, मम धर्मान् सुमं(ङ्)गलान् ।
याञ्छ्रद्धयाऽऽचरन् मर्त्यो, मृत्युं(ञ्) जयति दुर्जयम् ॥ 8॥

कुर्यात् सर्वाणि कर्माणि, मदर्थं(म्) शनकैः(स्) स्मरन् ।
मय्यर्पितमनश्चित्तो, मद्धर्मात्ममनोरतिः ॥ 9॥

देशान् पुण्यानाश्रयेत, मद्भक्तैः(स्) साधुभिः(श्) श्रितान् ।
देवासुरमनुष्येषु, मद्भक्ताचरितानि च ॥ 10॥

पृथक् सत्रेण वा मह्यं(म्),पर्वयात्रामहोत्सवान् ।
कारयेद् गीतनृत्याद्यैर्- महाराजविभूतिभिः ॥ 11॥

मामेव सर्वभूतेषु , बहिरन्तरपावृतम् ।
ईक्षेतात्मनि चात्मानं(यँ), यथा खममलाशयः ॥ 12॥

इति सर्वाणि भूतानि, मद्भावेन महाद्युते ।
सभाजयन् मन्यमानो, ज्ञानं(ङ्) केवलमाश्रितः ॥ 13॥

ब्राह्मणे पुल्कसे स्तेने, ब्रह्मण्येऽर्के स्फुलिं(ङ्)गके।
अक्रूरे क्रूरके चैव, समदृक् पण्डितो मतः ॥ 14॥

नरेष्वभीक्ष्णं(म्) मद्भावं(म्), पुं(म्)सो भावयतोऽचिरात् ।
स्पर्धासूयातिरस्काराः(स्), साहं(ङ्)कारा वियन्ति हि ॥ 15॥

विसृज्य स्मयमानान् स्वान्, दृशं(वँ) व्रीडां(ञ्) च दैहिकीम् ।
प्रणमेद् दण्डवद् भूमा- वाश्वचाण्डालगोखरम् ॥16॥

यावत् सर्वेषु भूतेषु, मद्भावो नोपजायते ।
तावदेवमुपासीत, वाङ्मनः(ख्)कायवृत्तिभिः ॥ 17॥

सर्वं(म्) ब्रह्मात्मकं(न्) तस्य, विद्ययाऽऽत्ममनीषया ।
परिपश्यन्नुपरमेत्, सर्वतो मुक्तसं(म्)शयः ॥ 18॥

अयं(म्) हि सर्वकल्पानां(म्), सध्रीचीनो मतो मम ।
मद्भावः(स्) सर्वभूतेषु, मनोवाक्कायवृत्तिभिः ॥ 19॥

न ह्यं(ङ्)गोपक्रमे ध्वं(म्)सो, मद्धर्मस्योद्धवाण्वपि ।
मया व्यवसितः(स्) सम्यङ्- निर्गुणत्वादनाशिषः ॥ 20॥

यो यो मयि परे धर्मः(ख्), कल्प्यते निष्फलाय चेत् ।
तदायासो निरर्थः(स्) स्याद्, भयादेरिव सत्तम ॥ 21॥

एषा बुद्धिमतां(म्) बुद्धिर्- मनीषा च मनीषिणाम् ।
यत् सत्यमनृतेनेह, मर्त्येनाप्नोति मामृतम् ॥ 22॥

एष तेऽभिहितः(ख्) कृत्स्नो, ब्रह्मवादस्य सङ्ग्रहः।
समासव्यासविधिना, देवानामपि दुर्गमः ॥ 23॥

अभीक्ष्णशस्ते गदितं(ञ्), ज्ञानं(वँ) विस्पष्टयुक्तिमत् ।
एतद् विज्ञाय मुच्येत, पुरुषो नष्ट सं(म्)शयः ॥ 24॥

सुविविक्तं(न्) तव प्रश्नं(म्), मयैतदपि धारयेत् ।
सनातनं(म्) ब्रह्मगुह्यं(म्), परं(म्) ब्रह्माधिगच्छति ॥ 25॥

य एतन्मम भक्तेषु, सम्प्रदद्यात् सुपुष्कलम् ।
तस्याहं(म्) ब्रह्मदायस्य, ददाम्यात्मानमात्मना ॥ 26॥

य एतत् समधीयीत, पवित्रं(म्) परमं(म्) शुचि ।
स पूयेताहरहर्मां(ञ्), ज्ञानदीपेन दर्शयन् ॥ 27॥

य एतच्छ्रद्धया नित्यमव्यग्रः(श्) शृणुयान्नरः ।
मयि भक्तिं(म्) परां(ङ्) कुर्वन्, कर्मभिर्न स बध्यते ॥ 28॥

अप्युद्धव त्वया ब्रह्म, सखे समवधारितम् ।
अपि ते विगतो मोहः(श्), शोकश्चासौ मनोभवः ॥ 29॥

नैतत्त्वया दाम्भिकाय, नास्तिकाय शठाय च ।
अशुश्रूषोरभक्ताय, दुर्विनीताय दीयताम् ॥ 30॥

एतैर्दोषैर्विहीनाय, ब्रह्मण्याय प्रियाय च ।
साधवे शुचये ब्रूयाद्, भक्तिः(स्) स्याच्छूद्रयोषिताम् ॥ 31॥

नैतद् विज्ञाय जिज्ञासोर्- ज्ञातव्यमवशिष्यते।

पीत्वा पीयूषममृतं(म्), पातव्यं(न्) नावशिष्यते ॥ 32॥

ज्ञाने कर्मणि योगे च, वार्तायां(न्) दण्डधारणे ।

यावानर्थो नृणां(न्) तात, तावां(म्)स्तेऽहं(ञ्) चतुर्विधः ॥ 33॥

मर्त्यो यदा त्यक्तसमस्तकर्मा,

निवेदितात्मा विचिकीर्षितो मे ।

तदामृतत्वं(म्) प्रतिपद्यमानो,

मयाऽऽत्मभूयाय च कल्पते वै ॥ 34॥

श्रीशुक उवाच

स एवमादर्शितयोगमार्गस् -

तदोत्तमश्लोकवचो निशम्य ।

बद्धां(ञ्)जलिः(फ्) प्रीत्युपरुद्धकण्ठो,

न किं(ञ्)चिदूचेऽश्रुपरिप्लुताक्षः ॥ 35॥

विष्टभ्य चित्तं(म्) प्रणयावघूर्णं(न्),

धैर्येण राजन् बहु मन्यमानः।

कृतां(ञ्)जलिः(फ्) प्राह यदुप्रवीरं(म्),

शीर्ष्णा स्पृशं(म्)स्तच्चरणारविन्दम्॥ 36॥

**उद्धव उवाच**

**विद्रावितो मोहमहान्धकारो,**

**य आश्रितो मे तव सन्निधानात् ।**

**विभावसोः(ख्) किं(न्) नु समीपगस्य,**

**शीतं(न्) तमो भीः(फ्) प्रभवन्त्यजाद्य ॥ 37॥**

**प्रत्यर्पितो मे भवतानुकम्पिना,**

**भृत्याय विज्ञानमयः(फ्) प्रदीपः ।**

**हित्वा कृतज्ञस्तव पादमूलं(ङ्),**

**कोऽन्यत् समीयाच्छरणं(न्) त्वदीयम् ॥ 38॥**

**वृक्णश्च मे सुदृढः(स्) स्नेहपाशो,**

**दाशार्हवृष्ण्यन्धकसात्वतेषु ।**

**प्रसारितः(स्) सृष्टिविवृद्धये त्वया,**

**स्वमायया ह्यात्मसुबोधहेतिना ॥ 39॥**

**नमोऽस्तु ते महायोगिन्, प्रपन्नमनुशाधि माम् ।**

**यथा त्वच्चरणाम्भोजे, रतिः(स्) स्यादनपायिनी ॥ 40॥**

**श्रीभगवानुवाच**

**गच्छोद्धव मयाऽऽदिष्टो, बदर्याख्यं(म्) ममाश्रमम् ।**

**तत्र मत्पादतीर्थोदे, स्नानोपस्पर्शनैः(श्) शुचिः ॥ 41॥**

ईक्षयालकनन्दाया,विधूताशेषकल्मषः ।
वसानो वल्कलान्यं(ङ्)ग, वन्यभुक् सुखनिः(स्)स्पृहः ॥ 42॥

तितिक्षुर्द्वन्द्वमात्राणां(म्) सुशीलः(स्) सं(यँ)यतेन्द्रियः।
शान्तः(स्) समाहितधिया, ज्ञानविज्ञानसं(यँ)युतः ॥ 43॥

मत्तोऽनुशिक्षितं(यँ) यत्ते, विविक्तमनुभावयन् ।
मय्यावेशितवाक्चित्तो, मद्धर्मनिरतो भव ।
अतिव्रज्य गतीस्तिस्रो, मामेष्यसि ततः(फ्) परम् ॥ 44॥

श्रीशुक उवाच
स एवमुक्तो हरिमेधसोद्धवः(फ्),
प्रदक्षिणं(न्) तं(म्) परिसृत्य पादयोः।
शिरो निधायाश्रुकलाभिरार्द्रधीर्-
न्यषिं(ञ्)चदद्वन्द्वपरोऽप्यपक्रमे ॥45॥

सुदुस्त्यजस्नेहवियोगकातरो,
न शक्नुवं(म्)स्तं(म्) परिहातुमातुरः ।
कृच्छ्रं(यँ) ययौ मूर्धनि भर्तृपादुके,
बिभ्रन्नमस्कृत्य ययौ पुनः(फ्) पुनः ॥ 46॥

ततस्तमन्तर्हृदि सं(न्)निवेश्य,
गतो महाभागवतो विशालाम् ।

यथोपदिष्टां(ञ्) जगदेकबन्धुना,

तपः(स्) समास्थाय हरेरगाद् गतिम् ॥ 47॥

य एतदानन्दसमुद्रसम्भृतं(ञ्),

ज्ञानामृतं(म्) भागवताय भाषितम् ।

कृष्णेन योगेश्वरसेविताङ्घ्रिणा,

सच्छ्रद्धयाऽऽसेव्य जगद् विमुच्यते ॥ 48॥

भवभयमपहन्तुं(ञ्) ज्ञानविज्ञानसारं(न्),

निगमकृदुपजह्रे भृं(ङ्)गवद् वेदसारम् ।

अमृतमुदधितश्चापाययद् भृत्यवर्तान्,

पुरुषमृषभमाद्यं(ङ्) कृष्णसं(ञ्)ज्ञं(न्) नतोऽस्मि ॥ 49॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)

सं(म्)हितायामेकादशस्कन्धे एकोनत्रिं(म्)शोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥